# Yamaprati Shivopadesham

# યમપ્રતિ શિવોપદેશમ્

## Document Information

Text title : Yamaprati Shivopadesham

File name : yamapratishivopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 73-83||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# યમપ્રતિ શિવોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

યે ચન્દ્રશેખર મહેશ કૃપાનિધાન
શ્રીવિશ્વનાથ કરુણાકર શઙ્કરેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૩૯॥

યે ભીમ ભર્ગ ભગવન્ ભવભવ્યરૂપ
ભાલેક્ષણ પ્રમથકોટિનિષેવિતેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૦॥

યે વિશ્વવન્દ્ય વિબુધોત્તમ વિશ્વબન્ધો
કાલાનલાભ નરસિહ્મનિપાતનેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૧॥

યે કાલકાલ પુરસૂદન પુણ્યમૂર્તે
વિશ્વમ્ભરાખિલગુરો શિવ શઙ્કરેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૨॥

યે દીનવત્સલ પરાત્પર દેવદેવ
દેવોત્તમોત્તમ સદાશિવ સર્વગેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૩॥

યે સર્વરક્ષણવિધાનવિનાશહેતો
ગૌરીમનોરમણ સર્વસુરાધિપેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ

તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૪॥

યે નિત્ય નિષ્કલ નિરઞ્જન ભાસમાન
માયાદ્યતીત નિગમાન્તવિભૂષણેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૫॥

યે નીલલોહિત નિરીશ્વર નિષ્પ્રપઞ્ચ
પઞ્ચાનનાવ્યય નિરઞ્જન નિર્ગુણેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૬॥

યે વિષ્ણુમુખ્યસુરવર્ગનિસર્ગસેવ્ય
સ્વર્ગાપવર્ગફલવર્ગવિધાયકેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૭॥

યે સોમ મઙ્ગલનિધાનવિધાનહેતો
કારુણ્યસાગર શરણ્ય ગણેશ્વરેતિ ।
નિત્યં વદન્તિ નિયમાત્સિતભસ્મભાલાઃ
તે શાઙ્કરાસ્તવ યમાન્વહમર્ચનીયાઃ ॥ ૧૪૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તઃ મહાદેવસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૭૩-૮૩॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 73-83..

Proofread by Ruma Dewan

*Yamaprati Shivopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*